Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५६५१ घ

Title श्रीमहात्रिपुरसुंदर्याकवचम्

Author

Extent ८

Subject तन्त्रम् संपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

5151
F — 8

Complete

Dharma

नं० ५६५१ - घ

श्रीमहात्रिपुरसुंदर्यीकवचम (तन्त्रम)

पत्राणि ८ (अष्ट) (सम्पूर्णम)

नं० ११५१

८ पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ११३४-क
श्रीमहात्रिपुरसुन्दर्याः
कवचम्
पत्राणि
तन्त्र ३६

१४३

नं० ५६५१-घ

श्रीमहात्रिपुरसुंदर्याः कवचम् ~~१४३~~ (तन्त्रम्)

पत्राणि ८ (अष्ट) (सम्पूर्णम्)

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰ सुं॰
क॰

ॐश्रीगणाधिपतयेनमः श्रीदेव्युवाच देवदेवमहादेवभक्तानांप्रीतिवर्धन
यत्त्वयूचितंपुरानाथकिमर्थंनप्रकाशते राजराजेश्वरीदेव्यास्त्रिपुरायाःस्वभाव
कं कवचंयदिमेप्रीतिःकथयस्ववृषध्वज श्रीभैरवउवाच सहस्रलक्षवारा
णिवारितासिपुनःपुनः स्त्रीस्वभावान्महादेविपुनस्त्वंपरिपृच्छसि अत्यंतगो
पनंगुह्यंकवचंसर्वकामदं तथापिकथयाम्यद्यतवप्रीत्यावरानने अस्यश्री
राजराजेश्वरीमहात्रिपुरसुंदरीकवचमंत्रस्य श्रीदक्षिणामूर्तिऋषिः चिदा
ह्लछंदः अद्वैतरूपिणीश्रीदेव्याराधनेचिच्छक्तिः पद्माबीजंश्रीमहात्रिपुर
सुंदरीराजराजेश्वरीदेवता ममयथोक्तफलसाधनेश्रीदेवीप्रीत्यर्थंजपेपा
ठेविनियोगः अथऋष्यादिन्यासः श्रीदक्षिणामूर्तिऋषयेनमः शिरसि
चिदाह्लछंदसेनमोमुखे अद्वैतरूपिणीश्रीदेव्याराधनेचिच्छक्तिभ्योनमः

१

© Dharmartha Trust J&K. Digitized by eGangotri

पादयोः पञ्चाबीजायनमः गुह्ये श्रीमहात्रिपुरसुंदरीराजराजेश्वरीदेवतायै
नमः हृदि ममयथोक्तफलसाधनेश्रीदेवीप्रीत्यर्थंजपेपाठेविनियोगः सर्वां
गेषु इतिऋष्यादिन्यासः अथकरन्यासः ॐश्रीमहात्रिपुरसुंदरीसर्वज्ञताश
क्तिधाम्नेअंगुष्ठाभ्यांनमः ॐमहात्रिपुरसुंदरीनित्यतृप्ताशक्तिधाम्ने तर्जनीभ्यां
नमः ॐश्रीमहात्रिपुरसुंदरीअनादिबोधशक्तिमध्यमाभ्यांनमः ॐश्रीमहात्रिपु
रसुंदरीस्वतंत्रशक्तिःअनामिकाभ्यांनमः ॐश्रीमहात्रिपुरसुंदरीनित्यमलुप्तश
क्तिःकनिष्ठिकाभ्यांनमः ॐमहात्रिपुरसुंदरींअनंतशक्तिधाम्नेकरतलकरपृ
ष्ठाभ्यांनमः इतिकरन्यासः एवंषडंगन्यासः अथध्यानं बालार्कमंडलाभा
संचतुर्बाहुंत्रिलोचनां पाशांकुशशरांचापंधारयंतींशिवांभजे भैरवीपा
तुशीर्षमेदेवीत्रिपुरभैरवी त्र्यक्षरीवदनेबालापातुसर्वत्रसिद्धिदा ऐंश्रींकं

ठेसदापातुत्रिपुराख्यासरस्वती ग्रष्टोरेदेवतापातुसिद्धेश्वरीललाटके त्रिकूटे
तुसदापातुत्रिपुरापरमेश्वरी हृदयेव्यान्महाविद्याराजराजेश्वरीचसा मालि
नीनाभिदेशेव्यान्महात्रिपुरभैरवी लोपामुद्रागुदेपातुदेवीत्रयोदशीपरा ।
2 मेढ्रेसात्रिपुरापातुत्रिपुरेशीसुखप्रदा क्लींपातुगुह्यदेशेतुकामेश्वरीहरप्रि
या श्रींपातुसर्वगात्रेषुनिर्मलात्रिपुरेश्वरी हंसश्वासादिनिःश्वासंपरानिर्वाण
सुंदरी हरप्रियाब्रह्मरंध्रेपायान्मेपरदेवता रतिनाथाललाटेव्यान्नेत्रेवाग्भ
वमालिनी लोपामुद्राभ्रुवोर्मध्येगंडौमायासदावतु पार्वतीमांललाटेव्या
न्नेत्रेनक्षत्रवल्लभा श्रोत्रेरतिप्रियापातुघ्राणेशक्रप्रियावतु कपोले
पातुसर्वत्रचाणिमापश्चिमेसदा ओष्ठेशंभुप्रियापातुदंतेप्राणास्तुरक्ष
तु जीवोजिह्वाप्रदेशेतुब्रह्माव्यात्तुर्यपरे तथा हंसःपृष्ठेसदापातुपृथ्वी

3

© Dharmartha Trust J&K. Digitized by eGangotri

सर्वांगकेवतु हृल्लेखाहृदयेपातुस्तनौपातुभृगुप्रिया क्रोधःकुक्षौसदा
पातुपिनाकीलिंगगोचरे शीर्षादिपादपर्यंतसर्वांगेपरमेश्वरी आधारेवा
ग्भवःपातुकामराजोहृदंबुजे त्रैलोक्येडामरंपातुब्रह्मरंध्रेतुसर्वदा शीर्षे
कूटंत्रयंपातुतथाकंठेसदावतु सर्वत्रमंत्रंकपोलेव्यात्सर्वंसर्वत्ररक्षतु ।
अणिमापश्चिमेपातुलघिमाचोत्तरेवतु पूर्वेव्यान्महिमासिद्धिरीशित्वा
दक्षिणेवतु वशित्वावायुनिलयेऐशेप्राकाम्यसिद्धिदा भुक्तिसिद्धिस्तथा
ग्नेय्यामिच्छासिद्धिश्चराक्षसे अधःपातुप्राप्तिसिद्धिर्मोक्षसिद्धिस्तथोर्ध्वके
ब्रह्माणीपूर्वदिग्भागेमाहेशीपातुपश्चिमे कौमारीदक्षिणेपातुचोत्तरेश
क्रवल्लभा ऐशान्यांवैष्णवीपायाद्वाराहीवायुमंडले चामुंडानैरृतेपातु
महालक्ष्मीर्धनंजयेसर्वसंक्षोभिणीहृपामूलाधारेसदावतु सर्वविद्राविणी

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰ सुं॰ क॰ 3

पातुस्वाधिष्ठानेसुरेश्वरी सर्वाकर्षणरूपाव्यान्मणिपूरे वरानने सर्व
स्यांसर्वदापातुहृदयेपरमेश्वरी मुद्रासर्वोन्मदापातुहृदयोपरिसुंदरी वि
शुद्धिचक्रेदेवेशिपातुनित्यंमहांकुशा वक्त्रेनित्यंमहेशानीत्रिखंडापरिर
क्षतु आज्ञाचक्रेसदापातुबीजमुद्राविषापहा सहस्रारेमहामुद्राखेचरी
पातुसर्वदा नचचक्रेस्थितामुद्राहृदादिपंचकेवतु योनिमुद्रामहामु
द्रासर्वत्रपरिरक्षतु आधारादिमहाचक्रेत्रिपुरापातुसर्वदा कामाकर्ष
णमुद्राव्यात्सदाकर्षणकर्मणि बुद्ध्याकर्षणमुद्राव्यात्परबुद्धिविक
र्षणे अहंकाराकर्षिणीव्यात्सर्वाहंकारकर्षणे शब्दाकर्षणरूपाव्या
त्शब्दाकर्षेतुसर्वदा स्पर्शाकर्षणरूपाव्यात्स्पर्शाकर्षणकर्मणि रू
पाकर्षणरूपाव्यात्सर्वरूपनिरूपणे रसाकर्षणरूपाव्यात्सदास

© Dharmartha Trust J&K. Digitized by eGangotri

र्वरसेषु से गंधाकर्षिणी रूपाव्यात्सर्वे गंधोपलब्धिषु चित्ताकर्षिणी रूपा
व्यान्मायाद्याकृष्टकर्मणि धैर्याकर्षिणी रूपाव्यात्सर्वे धैर्यविधौ सदा
स्मृत्याकर्षिणी रूपाव्यात्सर्वत्र स्मृतिकर्मणि नामाकर्षिणी रूपाव्यान्नामव्या
हरणे सदा बीजाकर्षिणी रूपाव्यात्सर्वबीजप्रबोधने आत्माकर्षिणी रूपा।
व्यात्सर्वात्माकर्षणे सदा अमृताकर्षिणी पायादमृताकर्षणे तथा शरी
राकर्षिणी पातु शरीराकर्षणे सदा सर्वकार्येषु सर्वत्र पातु मां त्रिपुरेश्वरी
अनंगकुसुमा पातु पूर्वस्यां दिशि सर्वदा अनंगमेखला पातु दक्षिणे काम
रूपिणी पश्चिमे सर्वदा पायादनंगमदना प्रिये उत्तरे पातु देवेशि त्वनंग
मदनातुरा अनंगरेखा चाग्नेय्यां पातु नित्यं महेश्वरी नैरृत्यां पातु देवे
शि सर्वदानंगरूपिणी अनंगांकुशा वायव्ये पातु नित्यं सुखप्रदा अनंगमा

© Dharmartha Trust J&K. Digitized by eGangotri

मालिनीदेवीचैशान्यांपातुसर्वदा चक्रस्यासर्वदापातुदेवीत्रिपुरसुंदरी
क्षोभिणीहृदयेपातुशीर्षेविद्राविणीतथा आकर्षिणीशिखांपातुकवचे
ह्लादिनीतथा सर्वसंमोहिनीनेत्रेसर्वगात्रेषुस्तंभिनी आकाशेजृंभिणी
पातुपातालेतुवशंकरी रंजनीदेवलोकेव्याइुन्मादिनीचभूतले सर्वार्थ
साधनेपायाद्भूतप्रेतालयेसदा सिद्धनामालयेपातुसर्वसंपत्तिरूपिणी
राक्षसानांसपत्नाणांसर्वमंत्रमयीप्रिये असुराणांनिवासेतुसर्वद्वंद्वक्ष
यंकरी सर्वदासर्वदापातुदेवीत्रिपुरवासिनी सर्वसिद्धिप्रदापातुसर्वसं
क्षोभरक्षतु सर्वसंपत्प्रदादेवीपातुराजगृहेसदा सर्वप्रियंकरीपातुस
र्वलोकेषुसर्वदा सर्वदापातुमांदेवीसर्वमंगलकारिणी सर्वकाम
प्रदादेवीसर्ववांछासुरक्षतु ऐश्वर्यंसर्वदापातुसर्वदुःखविमोचिनी सर्व

५

© Dharmartha Trust J&K. Digitized by eGangotri

मृत्युप्रशमनीपायान्नित्यंयमालये सर्वारंभेपातुदेवीसर्वविघ्नविनाशिनी
सर्वांगसुंदरीदेवीसर्वांगममितोवतु स्नेहसौहार्द्यकामेषुपातुसर्वांगसुंद
री सर्वसौभाग्यकामेषुसर्वसौभाग्यदायिनी सर्वसर्वदापातुत्रिपुराश्रीःशु
भप्रदा सर्वत्राचगृहेपातुसर्वशक्तिमयीवने सर्वैश्वर्यप्रदामार्गेसर्वज्ञान
मयीजले सर्वव्याधिषुसर्वत्रसर्वव्याधिविनाशिनी सर्वदासर्वतःपातुस
र्वाधारस्वरूपिणी सर्वपापहरादेवीसर्वमार्गेषुरक्षतु सर्वानंदमयीदेवी
नानासुकृतगोचरे सर्ववैरिभयेपातुसर्वरक्षास्वरूपिणी सर्वसंकल्पका
र्येषुसर्वकामफलप्रदा सर्वत्रसर्वदापातुदेवीत्रिपुरमालिनी वशिनी
वशकायेव्यात्कामेश्वरीचस्तंभिनी मोहनेमोदिनीपातुउच्चाटेविमलाव
तु वश्यकार्येरुणापातुजयिनीजयकर्मणि सर्वेश्वरीसर्वकार्येकौलिकी

© Dharmartha Trust J&K. Digitized by eGangotri

मेदकर्मणि चक्रेश्वरीपातुनित्यंदेवीसिद्धेश्वरीसदा पाशांकुशधनुर्वा
णासर्वदाकामरूपिणी रक्तंतुसततंभद्रेसर्वत्रायुधदेवता षडंगयुवती
पातुषडंगेषुसुरेश्वरी चंडेश्वरीपातुदंडेदानेरुद्रात्मसंज्ञका कामेश्वरीरतौ
पातुयुद्धेवज्रेश्वरीतथा भगमालिनीश्रीकामेसर्वत्रत्रिपुरांबिका विंदुचक्रे
श्वरीपातुसुंदरीतुशिवार्चने सर्वमंत्रेश्वरीपातुसर्वमंत्रस्यसाधने योगीश्व
रीस्नानकालेसर्वविद्येश्वरीप्रिये सर्ववीरेश्वरीपायादासनेशयनादिके स
र्ववागीश्वरीपातुसर्ववागीशसम्पदि सर्वविद्येश्वरीपातुसर्वविद्यासमन्वये
सर्वसिद्धेश्वरीपातुसर्वसिद्धिप्रदायनी सर्वकार्येषुसर्वत्रपातुत्रिपुरसुंदरी
कामेश्वरीतथापातुतिथौप्रतिपदिप्रिये भगमालिनीद्वितीयायांदेवी
सर्वार्थसाधनी तृतीयायांपातुनित्यंक्लिन्नातुमदनातुरा चतुर्थ्यांपातु

© Dharmartha Trust J&K. Digitized by eGangotri

भीरुंडापंचम्यांवह्निवासिनी महाविद्येश्वरीषष्ठ्यांसप्तम्यांशिवदूतिका
ग्रष्टम्यांतुरिता॰पातुनवम्यांकुलसुंदरी नित्यानित्यादशम्यांतुपायात्सक
लसिद्धिदा एकादश्यांनीलपताकाद्वादश्यांविजयावतु त्रयोदश्यांतुदेवे
शिसर्वदासर्वमंगला ज्वालामालाचतुर्दश्यांपूर्णिमायांतुचित्रिणी पं
चदश्यांसदापातुश्रीमत्त्रिपुरसुंदरी राजराजेश्वरीपातुसर्वकालेषुषो
डशी इतीदंकवचंदेविब्रह्मलोकेषुदुर्लभं तवप्रीत्यामयाख्यातंगोप
नीयंस्वयोनिवत् तवनाम्निश्रुतेदेविसर्वयत्तफलंलभेत् सर्वपापक्ष
यंयातिवांछासर्वत्रसिद्ध्यति नाम्नांशतगुणंस्तोत्रंव्याख्यानंचापितच्छ
तं तस्माच्छतगुणंध्यानंध्यानाच्छतगुणोमनुः मंत्राच्छतगुणंदेविक
वचंममचोदितं शुचिःसमाहितोभूत्वाभक्तिश्रद्धासमन्वितः संस्थाप्य

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰सुं॰
क॰
6

वामभागे तु शक्तिं स्वामिपरायणीं रक्तवस्त्रसमासीनां शिवमंत्रधरां शुभां याशक्तिः सा महादेवी शिवरूपस्तु साधकः अन्योन्यचिंतनाद्देवि हरत्वमुप जायते शक्तियुक्तो यजेद्देवी श्रीचक्रे लक्षणायते भोगैश्च मधुपर्काद्यैस्तांबूलैश्च सुवासितैः ततश्च कवचं दिव्यं पठेदेकमनाः प्रिये तस्मात्सर्वार्थसिद्धिः स्यान्नात्र कार्या विचारणा इदं रहस्यं परमं परं स्वस्त्ययनं महत् यस्तु भक्त्या पठेद्देवि शृणुयाद्वा समाहितः स सर्वांल्लभते कामान् परे देवीपदं व्रजेत् सकृद्यस्तु पठेद्देवि कवचं देवदुर्लभं सर्वयज्ञफलं तस्य भवत्येव न संशयः संग्रामेषु जयेच्छत्रून् मातंगानिव केसरी दहेत्तृणं यथा वह्निस्तथा शत्रूंजयेत्सदा न तस्य शास्त्र शस्त्राणि शरीरे प्रभवंति हि तस्य व्याधिः कदाचिन्न दुःखं नास्ति वरानने गतिस्तस्यैव सर्वत्र वायोस्तुल्या सदा भवेत् दीर्घाऽऽयुः का

© Dharmartha Trust J&K. Digitized by eGangotri

सभोगेशोधनधान्यसमृद्धिमान् जितव्याधीरूपवान्स्याद्गुणवानपिजायते च
तुर्वर्गःकरेतस्यतिष्ठत्येवनसंशयः अन्यस्यवल्लभःसोपिपुत्रदारकुलान्वितः
इहलोकेसुखीभूत्वापरेमुक्तोभविष्यति नतस्यदुर्गतिर्देविकदाचिदपिजाय
दुर्ग्रहाःसुग्रहायांतिवशंगच्छंतिमानवाः नतस्यविघ्नोभवतिनशोकोभुवि
जायते वेतालाश्चपिशाचाश्चराक्षसाःसमयप्रदाः तेसर्वेविलयंयांतिक
वचस्यापिकीर्तनात् तत्रदेशेनदुर्भिक्षंनचमारीप्रजायते नचरोगाःप्रजायंते
नोत्पाताःप्रभवंतिच त्रिविधाश्चैवयोगिन्यस्तस्यरक्षणसन्निधौ शांतिंचैवप्र
यच्छंतिरक्षंतिपुत्रवत्सदा शत्रवस्तस्यदेवेशिचिंतनात्प्रलयंगताः विनश्यं
तिनसंदेहोयोगिन्योभक्षयंतितान् शांतिकादीनिकर्माणिमारणादीनिया
निच वाच्यमात्रेणदेवेशितस्यसिद्ध्यंतिभूतले नपापैर्लिप्यतेसोपिमहोग्रैर

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि· सुं·
क·

पिदारुणेः नकालस्यवशंगच्छेन्नजरायानदुःखितः सर्वदाचसुखप्राप्तिःसर्व
तीर्थफलंलभेत् नानेनसदृशःकश्चित्कवचोप्युविजायते देवासुरमनुष्या
णांस्तवरूपंसुखावहं येनविज्ञातमात्रेणस्मृतेनैवचसुंदरि अप्रतयांल
भतेकामान्मुक्तिमार्गंसगच्छति सर्वलक्षणहीनोपिस्मरणात्कल्मषापहः
अहोकवचमाहात्म्यंपठमानम्यनित्यशः विनापिलययोगेनसयोगस
मतांव्रजेत् भूर्जेत्वचिसमालिख्ययंत्रंमंत्रविनिर्मितं मध्येत्रिकोणंसंले
ख्यसाध्यसाधकयोर्लिपिं तदूर्ध्वेमूलमंत्रांश्चमातृकाभिश्चवेष्टयेत् का
लागुरुविमिश्रेणचंदनेनापिसुंदरि एतद्यंत्रंमहेशानिसुरासुरसुदुर्लभं
गोरोचनाकुंकुमाभ्यांतद्वाह्येकवचंलिखेत् श्वेतसूत्रेणसंवेष्ट्यलाक्ष
यापरिवेष्टयेत् पंचामृतैःपंचगव्यैस्नपयित्वाशुभेहनि संपूज्यदेवरू

© Dharmartha Trust J&K. Digitized by eGangotri

पीतांभूरिंदत्वाचदक्षिणां प्राणप्रतिष्ठामंत्रेणप्राणांस्तत्रनिवेशयेत् अंत
योनिंततोध्यात्वाकंठलग्नांधनप्रदां शीर्षेवश्यकरींदेविकक्ष्यांस्तंभनकारि
णीं बद्ध्वावामभुजेदेविवैरपक्षक्षयंकरीं जठरेरोगशमनीपुत्रदाहृदिसंस्थि
ता विद्याकरीललाटस्थाशिखायांतुशुभप्रदा सर्वकामप्रदादेवीसर्वरोग
क्षयंकरी दक्षिणेबाहुमूलेपियदितिष्ठतिसर्वदा तदासर्वार्थसिद्धिःस्याद्य
द्यन्मनसिवर्तते एतस्यकवचस्यैवपठनंधारणंप्रिये कथितंतुतवस्नेहा
द्गोपनीयंसदाभुवि गुरोःपादप्रसादेनश्रीविद्यायदिलभ्यते तथैवकवचं
देवित्रिषुलोकेषुदुर्लभं सचदेवोहरःसाक्षात्पत्नीचपरमेश्वरी यस्यभ
क्तिर्गुरौदेविकर्तव्यादेववत्सदा तदामंत्रस्यसिद्धिर्भवतिनान्यथा कव
चस्यतथासिद्धिर्गुटिकाचसुरेश्वरि अज्ञात्वाकवचंदेविश्रीविद्यांयोजपेत्

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि॰सुं॰
क॰

प्रिये नचाप्नोतिफलंतस्याः परेचनरकंब्रजेत् सत्यंसत्यंपुनःसत्यंसत्यंस
त्यंपुनःपुनः नशक्नोमिप्रभावंहिकथितंकवचस्यतु जिह्वाकोटिशतैर्देवि
वक्त्रकोटिशतैरपि पंचास्येनकथंदेविवर्णितुंशक्यतेमया यस्मैकस्मैन
दातव्यंसुगोप्यमतिदुर्लभं नदेयंपरशिष्यायकृपणायसुरेश्वरि गुरुभक्ति
विहीनायपरहिंसारतायच निंदकायकुचैलायदांभिकायसुरेश्वरि योद
दातिनिषिद्धेभ्यः कवचंमन्मुखोदितं तस्यनश्यंतिदेवेशिविद्यायुःकीर्तिसंच
याः तंहिंसंतिसदादेव्योयोगिन्योमातृमंडलात् परेनरकमाप्नोतिजन्म
कोटिशतानिच देयंशिष्यायशांतायगुरुभक्तिरतायच सर्वलक्षणयु
क्ताययंत्रमंत्रधरायच इतिश्रीमहामहेश्वरीतंत्रेश्रीमहाचक्रपीठेश्रीम
हाराजराजेश्वरीश्रीमहात्रिपुरसुंदर्याःकवचंसंपूर्णं ॥ ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri